National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 109-112
© 2025 NJHSR
www.sanskritarticle.com

प्रवीणः एम्. सज्जनः
शोधच्छात्रः (Ph.D.),
कर्नाटकसंस्कृतविश्वविद्यालयः,
बैंगलोर

# भामत्यनुसारं मरुमरीचिग्रन्थभागमाश्रित्य अध्यासविषयकम् एकं विश्लेषणम्

**प्रवीणः एम्. सज्जनः**

**शोधसारः –**

**तत्र अध्यासः तावत् वक्तव्यः एव – यतोहि – अनुमानानि इत्थं प्रदर्शयिष्यन्ते - । शास्त्रं आरब्धव्यं विषयप्रयोजनवत्त्वात् दर्शादिवत् [1]। शस्त्रं प्रयोजनवत् बन्धनिवर्तकज्ञानहेतुत्त्वात् रज्जुरियं सर्पादिवत्। बन्धः ज्ञाननिवर्त्यः अध्यस्तत्त्वात् । इति अध्यासः तावत् उच्यते – तत्र अध्यास्तः यो यो पदार्थः वर्तते स सर्वोपि ज्ञाननिवर्त्यः एव इति अत्र अवगन्तुं शक्यते। अतः कारणात् अत्र अध्यासः निरूपणीयः इति अवगते सति वाचस्पतिमिश्राचार्यलिखित भामती ग्रन्थमाश्रित्य अध्यासविषये एकः शोधलेखः अयं वर्तते।**

प्रकाशमानत्वमेव सत्त्वम् इति पूर्वपक्षिणा कथितस्य व्यभिचारः प्रदर्शितः । इदानीं तस्य अङ्गीकारे को दोषः ? इति प्रदर्श्यते । तथा सति ….. इत्यारभ्य ।

यदि प्रकाशमानत्वमेव सत्वं स्यात् तर्हि मरुषु (सिकतासु) मरीचिचयं (किरणसमूहं) मन्दाकीनी इयम् इत्यभिसन्धाय प्रवृत्तः तज्जलं पीत्वापि पिपासाम् उपशमयेत्। कुतः ? तत्र वस्तुतः तोयं नास्ति चेदपि मरीचीनां तोयात्मना प्रकाशमानत्वमस्ति अतः। किन्तु तथा न भवति । तस्मात् अकामेनापि भवता आरोपितस्य प्रकाशमानस्य वस्तुसत्वं न अभ्युपगन्तव्यम्।

पू.प- तत्र सलिलं मरीचिरूपेण अवस्तुसत्, स्वरूपेण तु परमार्थसदेव , सिद्धान्तिमते तावत् देवेद्रियादयः स्वरूपेणापि असन्तः एव इत्यतः तेषाम् अनुभवगोचरत्वमेव नास्ति । तस्मात् एव तेषामारोपः अपि कर्तुं न शक्यते इति। न च साम्प्रतम्॥

सि- भोः असताम् अनुभवगोचरत्वं नास्तीति न वाच्यं। यदि तथा तर्हि तोयात्मना असतां मरीच्यादीनां कथं अनुभवगोचरत्वम् उच्यते ? तथा च सः नियमः नास्ति। किञ्च मरीचीनां स्वरूपसत्त्वमस्ति चेदपि तोयात्मना तु सन्तः न भवति। (इति प्रतिबन्धी)

पू.प – भोः अभावः इति पदार्थान्तरं किञ्चित् नास्ति अपि तु भावः एव केनचित् रूपेण भावः केनचिद्रूपेण अभावः इति व्यवह्रियते। "भावान्तरमभावो हि कयाचित्तु व्यपेक्षया" तथा च मरीचिः स्वेन रूपेण सदेव किन्तु जलाभावात्मना असत्। अतः अभावः असत्पदार्थः इति पृथक् नाङ्गीकार्यम्। तथा च अस्य मरीच्यादेः अनुभवगोचरत्वं भवितुमर्हति। कुतः भावात्मना उपादेयत्वात् (अस्त्… प्रतीतिविषयत्वं)। किन्तु सिद्धान्ते प्रपञ्चादेः अत्यन्तमेव असत्वात् नानुभवगोचरता न वा आरोपः।

अत्र बौद्धः समाधत्ते- असदपि प्रकाशते अविद्याकारणात्। असतः प्रकाशनं ज्ञानम्। विषयः एव नास्ति चेदपि ज्ञानं तत्प्रकाशनम्। ज्ञानस्य असद्विषयकत्वं कथमागतम् इति चेत् स्व समानपूर्वप्रत्ययात् आसादितं वर्तते।

**Correspondence:**
प्रवीणः एम्. सज्जनः
शोधच्छात्रः (Ph.D.),
कर्नाटकसंस्कृतविश्वविद्यालयः,
बैंगलोर

एतत् प्रति कोपि दृष्टान्तः अस्ति वेति चेत् नास्ति – अदृष्टान्तसिद्धस्वभावः वर्तते अस्य ज्ञानस्य , स एव विशेषः ज्ञानस्य अस्ति । तथा च ज्ञानस्य असत्प्रकाशनशक्तिरेव अविद्या तया असदपि प्रकाशते।

पू.प- इति न साम्प्रतम्। कुतः ? अत्र पृच्यते भोः या सा शक्तिः अविद्या तस्याः शक्यं किम् इति तत्र असत् इति उत्तरितं चेत् अग्रिमः प्रश्नः – किं तदसत् कार्यम् आहो ज्ञाप्यम्? (उभयमपि न कथम्?)

न तावत् कार्यम्- असतः तत्वं (उत्पत्तिः ) नास्तीत्यतः न तत् कार्यम्। ज्ञाप्यमपि न कुतः ? ज्ञाप्यं नाम ज्ञानम् उत्पादयतीत्यर्थः । प्रकृते उदाहरणार्थं शुक्तिरूपस्थले रजतज्ञाने सा शक्तिः अस्ति तया रजतं ज्ञाप्यम् इति चेत् तद्विषयके ज्ञानान्तरं जननीयम्। किन्तु ज्ञानान्तरमेव न उपलभ्यते । उपलभ्यते इत्यभ्युपगम्यते चेदपि तत्रत्य शक्तेः किं विषयः ? इत्येवम् अनवस्था अतः नापि ज्ञाप्यम्

भोः विज्ञाननिष्ठशक्त्या असतः कार्यत्वं ज्ञाप्यत्वं न चिन्तनीयम् अपि तु विज्ञानस्वरूपमेव असतः प्रकाशः इति चेत् , असद्विषयकं ज्ञानम् इति चेत् असतः ज्ञानस्य च सम्बन्धः वक्तव्यः सः कः ?

प्रकृते इदं ज्ञानम् असदधीननिरूपणम् , अर्थात् ज्ञानस्य निरूपणम् असदधीनं वर्तते । अतः असदधीननिरूपणत्वम् एव सम्बन्धः इति चेत् पूर्वपक्षी बौद्धम् उपहसति नु एवं चेत् असदेव अन्येभ्यः प्रत्ययं व्यावर्तयन्नस्ति, किन्तु प्रत्ययः स्वविषये किमपि न उत्पादयन्नस्ति। अन्यत्र तु घटादिविषयकाः प्रत्ययाः घटादिषु ज्ञाततां जनयन्ति आहो विषयावरणनाशं जनयन्ति अतिशयं कुर्वन्ति। अत्र तु किमपि अकुर्वतः प्रत्ययस्य असत् निरूपणं करोति अतः अयं प्रत्ययः तपस्वी वर्तते। यस्य् अनिरूपणम् असति आयतते (नेयं सति सप्तमी अधिकरणरूपैव) असतः आधारत्व त्वात् प्रत्ययः किमपि न करोतीति उपत्वसः

**(मरुमरीचिसिद्धान्तभागः)**

सि. असदपि प्रकाशते अतः प्रकाशमानत्वं सत्वं न असद्वृत्तित्वात् इति समाधेयं वर्तते। तथा च पूर्वपक्षः तदवस्थः असीत् – निरस्तसमस्तसामर्थ्यस्य निस्तत्वस्य अनुभवगोचरत्वं न भवति इति अत्र ब्रूमः

“किं मरीचयः तोयात्मनापि सतत्वाः सन्तः वा? येन तेषाम् अनुभ्वगोचरत्वं स्यात्। न सन्तः इति उत्तरं वदिष्यति तथा च स्ववचनव्याघातः। पूर्वं भणितं निस्तत्वस्य भानं नास्तीति, इदानीं तावत् तोयात्मना असतां मरीचीनां भावम्ङ्गीक्रियते इति।

पू – मरीचीनां तोयात्मना असत्वात् न सतत्वाः असन्तः द्विविधं हि वस्तूनां तत्वम् – सत्वं- स्वतः असत्त्वम् – परतः स्वरूपपररूपाभ्यां नित्यं सदसदात्मके। वस्तुनि ज्ञायते किञ्चित् रूपं कैश्चित् कदाचन॥ इति ।

तथा च मरीचीनां मरीचित्वेन सत्वं , तोयात्मना असत्वम्।

सि – भोः यस्मिन् प्रत्यये मरीचिः तोयात्मना भासते स किं तात्विको न वा? यथार्थज्ञानं न वा?

यदि सः प्रत्ययः तात्विकः तर्हि सः यस्यास्ति सः न भ्रान्तः प्रत्ययश्च अबाध्यः ।

पू- भोः तोयात्मना अविद्यमानान् मरीचीन् यदि अतोयतया एव गृह्नीयात् तर्हि न बाध्येत । अतोयात्मकान् मरीचीन् तोयतया गृह्नन् भ्रान्तः एव सा च भ्रान्तिरेव।

सि – हन्त । तोयाभावाभिन्नानां मरीचीनां तोयभावात्मत्वं सत् न ।कुतः ? तोयाभावेन सह अभिन्नत्वात् एव तेषां तोयात्मत्वं न उपपद्यते । अतः न तत् सत् । नापि असत् कुतः? पूर्ववादिनैव कथितमेवम्

भावान्तरमेव अभावः, न कश्चित् अन्यः अनिरूपणात् तथा च मरीचीनाम् तोयतया असत्वं नाम अभावात्मकत्वं वक्तुं न शक्यते । यतः ह् असत् नाम अन्यत् वस्तु नास्ति अतः ।

एवं च मरीचिषु प्रतीयमानं तोयत्वं सदपि न असदपि न । वस्त्वन्तरं स्यात् आरोपितं वस्तु इत्यपि न वाच्यम् कुतः ?

तद्धि वस्त्वन्तरं किमिति पृच्यते च्त् मर्चयः भवेयुः अन्यथा गङ्गादिगतं सलिलं वा भवेत् । यदि तत मरीचिः स्यात् तर्हि इमे मरीचयः इति प्रत्ययः उद्भवेत् तथा तु नास्ति अतः तन्न । द्वितीयविकल्पे तु गङ्गायां तोयमिति स्यात् न तु इह – एतत्कालदेशविशिष्टत्वेन तत्रापि देशविशेषः दोषवशात् न स्मर्यते इति स्थितावपि केवलं तोयं इति प्रत्ययः भवेत् न तु इह तोयम् इति

अतः विकल्पासहत्वात् तत् वस्त्वन्तरमपि न। अत्र तर्हि इदं निरस्तसमस्तसामर्थ्यम् अलीकं अत्यन्तं असत् एव भवतु इत्यपि न साम्प्रतम्। कुतह् ? य़दि तस्य् असत्त्वं स्यात् तर्हि तस्य अनुभवग्चरत्वमेव न स्यात् अतः तस्य अनुङभवगोचरत्व-अनुपपत्तेः इति पूर्वमेव असत्वं निरस्तम्।

तस्मात् न सत्, नाप्यसत्, नापि सदसत् कुतः? एकत्रैव उभयोः परस्परविरोधाअत् । तर्हि किं सदपि न असदपि न अनिर्वाच्यमेव त्यं मरीचिषु आरोपणीयम् आस्तेयम्। ससद्विलक्षणमेव इदम्। इदमेव अनृतमिति पदेन विवक्षितम् ।

एवं क्रमेण अध्यस्तं यत्तोयं तत् परमार्थतोयमिव (वस्तुतः परमार्थो न) पूर्वदृष्टमिव (पूर्वदृष्टं तु गङ्गातोयम् – इह विद्यमानं तद्वत्) अर्थात्

प्राक्तनं दर्शनमात्रं विवक्षितं । वस्तुतः तु पूर्वदृष्टमपि न तोयमपि न, किन्तु अनृतम् अनिर्वाच्यम्। तुल्यया रीत्या देहेन्द्रियादिप्रपञ्चञ्च् अपि अनिर्वाच्यः,पूर्वतनः न च्दपि पूर्वमिथ्याप्रत्ययेन उपदर्शितः इव (पूर्वाध्यासप्रयुक्तः ) परत्र चिदात्मनि अध्यस्यते इति उपपन्नमेव।

परत्र पूर्वदृष्टावभासः इति अध्यासलक्षणयोगाच्च। मरुमरीचिस्तु लोके बाध्यते देहेन्द्रियादीनां तावत् कथं बाधः इति चेत् तदग्रे उपपादयिष्यते ।

सत्यानृतयोः मिथुन्करणे (उपस्थितौ) अनृतस्य कथम् उपस्थितिरिति उपपदनीयम्। इदानीं सत्यस्य उपस्थितिः प्रतिपाद्यते । चिदात्मा तु श्रुतिस्मृति-इतिहासपुराणजन्यज्ञानविषयः श्रुतिमूलकाः श्रुत्यविरुद्धाश्च ये न्यायाः तैः यस्य शुद्धबुद्धम्क्तस्वभावत्वं निर्णीतमस्ति तादृशः सत्वेनैव निर्वाच्यः । का च सत्ता ? अबाधिता स्वयम्प्रकाशता च सा सत्ता। अपि च सा चिदात्मनः कश्चन धर्मो न अपि तु स्वरूपमेव। न तु तदतिरिक्तं सत्तसमान्यसमवायः , अर्थक्रियाकारीता वा इत्येतत् अखण्डितम्।

तथा च एवं लक्षणकः अध्यासः अनिर्वचनीयः सर्वेषामेव परीक्षकाणां संमतः । किन्तु तद्भेदे अध्यासविशेषे एव (तल्लक्षणं किं स्यात् ? का प्रक्रिया ? को विशेषः ) इत्यत्र केवलं ते परीक्षकाः विप्रतिपद्यन्ते इति कृत्वा अनिर्वाच्यतां द्रढयितुमेव भाष्यकाराः ख्यातिवादस्य उपन्यासं कुर्वन्ति।

**अध्यासप्रयोजनम्**

अद्वैतवेदान्ते प्रतिपाद्यविषयः तावत् जीवब्रह्मणोरैक्यम्, मुक्तिश्च शास्त्रस्यास्य प्रयोजनम् । जीवब्रह्मणोः ऐक्यं लोके प्रसिद्धं चेत् न हि तज्ज्ञानाय अद्वैतवेदान्ते प्रज्ञावतां प्रवृत्तिः स्यात् । परन्तु अस्ति हि लोके अनुभवः शरीरेन्द्रियमनोबुद्ध्यादिभिः अवच्छिन्नः जीवो शास्त्रप्रतिपादितात् नित्यशुद्धबुद्धमुक्तस्वभावात् ब्रह्मणो भिन्नः इति । जीवब्रह्मणोः अयं भेदः तात्त्विकः चेत् न हि शास्त्रशतैः सः दूरीकर्तुं शक्यते। अतो जीवब्रह्मैक्यरूपविषयसिद्धये आदौ ब्रह्म एव अज्ञानकारणात् जीवो भवति इति ब्रह्मणः जीवत्वम् मिथ्या अध्यासकार्यमिति प्रतिपादनीयम् । अध्यासस्वरूपस्य ज्ञानं विना जीवस्य अध्यासकार्यत्वं नैव बुद्धिगोचरं भवतीति अध्यासः आदावेव आलोचनविषयतां याति ।

किञ्च, बन्धनिवृत्तेर्हि मोक्षः सम्भवति । जीवस्य अविद्यादिकृतबन्धः यदि पारमार्थिकः तर्हि न केनाप्युपायेन तस्य निवृत्तिः सम्भवति । बन्धनिवृत्तेरसम्भवाच्च मुक्त्यसिद्धेः वेदान्तशास्त्रमेव विफलं स्यात्, न स्यात् तत्र प्रवृत्तिर्मुमुक्षूणाम् । अत्रोच्यते, न हि अविद्यादिकृत-कर्तृत्वभोक्तृत्वादिबन्धः पारमार्थिकः। बन्धोऽयं ब्रह्मणि आरोपितः, जीवस्य स्वस्वरूपज्ञाने सति एतेषां मिथ्याभूतानां बन्धानां निवृत्तिर्भवति, यथा हि रज्जुस्वरूपज्ञाने सति मिथ्याभूतसर्पस्य निवृत्तिर्भवति तद्वत्। छान्दोग्योपनिषदि श्रूयते च तरति शोकम् आत्मवित् इति। अतोऽद्वैतवेदान्तस्य प्रयोजनसिद्धये बन्धस्य मिथात्वस्य अध्यस्तत्वस्य च प्रतिपादनार्थम् अध्यारोपापरपर्यायिस्य अध्यासस्य लक्षणप्रमाणज्ञानं सुतरामपेक्षितम्। वेदान्तशास्त्रेषु ब्रह्मविचारः प्रस्तुतः। विचारश्च सन्दिग्धे सप्रयोजने च विषये सम्भवति । ननु सर्वेषामेव अहमिति प्रत्यये भासमानत्वात् न हि ब्रह्म सन्दिग्धम्। आत्मनो यथार्थस्वरूपस्य ज्ञानेन भवति संसारनिवृत्तिः, न च लोकप्रसिद्धात् आत्मानुभवात् अन्यः आत्मनो यथार्थस्वरूपस्य अनुभवो विद्यते । तादृशे आत्मयाथात्म्यानुभवे सत्यपि संसारस्य निवृत्त्यभावात् न हि ब्रह्मणः प्रयोजनमपि किञ्चिदस्ति । । अतः सन्दिग्धत्वसप्रयोजनत्वाभावात् न विचार्यं ब्रह्म । अत्रोच्यते, प्राकृतानां जनानां अहमित्यनुभवे न हि श्रुतिप्रतिपाद्यं नित्यशुद्धबुद्धमुक्तस्वभावम् असंसारि आत्मतत्त्वं भासते । देहेन्द्रियमनोबुद्ध्यादीन् विषयान् तद्धर्मांश्च आत्मनि अध्यस्यैव अहं गौरः, अहं काणः, अहं सन्दिग्धे, अहं निश्चिनोमि इत्यादिव्यवहाराः। प्रवर्तन्ते। अतः आध्यासिक एव अहमनुभवः साधारणजनानाम्। न केवलं साधारणजनानां पण्डितानामपि अहमनुभवः तदनुयायिलौकिकव्यवहारश्च अध्यासपूर्वकः एव अतः जीवानां यथार्थब्रह्मस्वरूपस्य ज्ञानाभावात् तज्ज्ञानलाभाय विचार्यं ब्रह्मेति आपतति। श्रुतिप्रतिपादितब्रह्मणः साक्षात्कारे सति । शुकवामदेवादीनामिव मोक्षः ध्रुव एव । अतो ब्रह्मविचारस्य सप्रयोजनत्वमपि सिद्ध्यति। अत इदं ब्रह्म । सामान्यतो ज्ञातं विशेषतः अज्ञातम्। तथाहि देहेन्द्रियादिषु अध्यासवशात् देहेन्द्रियादिभिः अभिन्नतया ब्रह्म सामान्यतः सर्वैर्विज्ञायते । परन्तु सर्वोपाधिविनिर्मुक्ततया विशेषतो ब्रह्मणः ज्ञानं नैव जीवानामस्ति । अतो विचार्यं ब्रह्म। उच्यते च मण्डनमिश्रेण ब्रह्मसिद्धौ –

**सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते।**
**प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥** इति ।

अध्यासप्रतिपादनं विना नैव ब्रह्मणः सन्दिग्धत्वं सप्रयोजनत्वं च प्रतिपादयितुं शक्यते, न च तेन। विचार्यत्वं ब्रह्मणः शक्यते प्रतिपादयितुमिति अध्यासस्य आलोचनं सुतरामपेक्ष्यते।

उपनिषद आधारीकृत्य एव वेदान्तशास्त्राणां प्रवृत्तिः। उच्यते च शङ्कराचार्येण। जन्माद्यधिकरणभाष्ये वेदान्तवाक्य-कुसुम-ग्रथनार्थ-त्वात् सूत्राणाम् इति। उपनिषत्सु विधिमुखेन निषेधमुखेन च ब्रह्मस्वरूपं प्रतिपाद्यते। तथाहि निषेधद्वारकब्रह्मप्रतिपादकानि उपनिषद्वाक्यानि तावत् - नेह नानास्ति किञ्चन, अशब्दमस्पर्शम-रूपमव्ययम्, अवाङ्मनसगोचरम् इत्यादीनि। विधिमुखेन ब्रह्म प्रतिपादयन्ति सत्यं ज्ञानमनन्तं ब्रह्म, सर्वं खल्विदं ब्रह्म, सच्चिदानन्दं ब्रह्म इत्यादीनि उपनिषद्वाक्यानि । अत्र चायं पर्यनुयोगः - ननु इह ब्रह्मणि नानाभावात् कथं सर्वं खल्विदं ब्रह्म इति ब्रह्मणः सर्वव्यापकता

सिध्यति। अत उपनिषद्वाक्यानां मिथो विरोधात् न हि प्रामाण्यं तेषां अपास्तं च प्रामाण्यं तदाश्रितानां वेदान्तशास्त्राणाम्। अत्रोच्यते, न हि उपनिषद्वाक्यानां मिथो विरोधोऽस्ति। निषेधमुखेनैव ब्रह्मस्वरूपं सुवचम्। न हि ब्रह्मणि नानात्वमस्ति । न चानेन ब्रह्मणः सर्वव्यापकत्वविरोधः। सर्वव्यापकत्वं च ब्रह्मणः ब्रह्मणि आरोपितेषु अखिलेषु विषयेषु ब्रह्मणः अनुस्यूतत्वात्। उच्यते च शङ्कराचार्येण बृहदारण्यकोपनिद्भाष्ये - " तत्र च दर्शनविषये ब्रह्मणि न इह नाना अस्ति किञ्चन किञ्चिदपि; असति नानात्वे, नानात्वम् अध्यारोपयति अविद्यया" इति । तस्मात् अध्यासकारणादेव नानात्वप्रतीतिः भवति, न पारमार्थिकं नानात्वम् अस्ति। तेन उपनिषद्वाक्यानां विरुद्धार्थ-प्रतिपादकता अपि नास्ति, तदाश्रितानां वेदान्तग्रन्थानाम् अप्रामाण्य-शङ्का अपि नापतति। अतोऽयमध्यासः अद्वैतवेदान्ततत्त्वालोचन-प्रसङ्गे महद् गुरुत्वमावहति। 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इत्येव उपदेशप्रक्रिया अद्वैतवेदान्ते। अपवादस्य अध्यारोपपूर्वकत्वात् आदौ अध्यारोपः प्रतिपादनीयः, तदनन्तरं च अध्यारोपितमिथ्याभूतविषयाणां निषेधो विधेयः। उच्यते च वेदान्तसारस्य बालबोधिनीटीकायाम् आपोदेवेन 'अपवादस्य अध्यारोपपूर्वकत्वात् प्रथमम् अध्यारोपं निरूपयति' इति। अतोऽद्वैतवेदान्तविचारप्रसङ्गे आदावेव अध्यारोपापरपर्यायस्य अध्यासस्य विचारः कर्तव्य इति अध्यासप्रयोजनं स्पष्टम् ।

**अध्यासपदार्थः**

अधीत्युपसर्गपूर्वकाद् दिवादिगणीयात् अस् धातोः घञ्प्रत्यये अध्यासपदं निष्पद्यते। अधीत्यस्य उपरि इत्यर्थः। अस्-धातुः क्षेपणार्थे वर्तते, 'असु क्षेपणे' इति धातुपाठात् । घञ्-प्रत्ययः भावार्थे कर्मार्थे च वर्तते। एकस्य वस्तुनः उपरि अपरस्य वस्तुनः (भ्रमवशात्) क्षेपणस्य, (भ्रमवशतः) क्षिप्तस्य अपरस्य वस्तुनो वा अध्यासपदेन ग्रहणं भवति व्युत्पत्तिवशात् । तथाहि भावार्थे घञ्-प्रत्यये निष्पन्नस्य अध्यासपदस्य अर्थस्तावत् अध्यारोपणक्रिया। कर्मवाच्ये घञ्प्रत्यये निष्पन्नस्य अध्यासपदस्य अध्यारोपितं वस्तु एवार्थः। यथा रज्जौ भ्रमवशात् यत् सर्पज्ञानं जायते तदपि अध्यासपदवाच्यम्, रज्जौ यस्य सर्पस्य ज्ञानं भवति सः सर्पोऽपि अध्यासपदवाच्यः। प्रथमस्य अध्यासस्य ज्ञानाध्यास इति द्वितीयस्य च अर्थाध्यास इति अभिधानम्। एतयोर्विचारः अग्रे विधास्यते

**ग्रन्थसूची**


- भामती
- ब्रह्मसूत्रम्
- दीपिका
- सर्वदर्शनसङ्ग्रहः